# Shri Shabarigirisha Ashtakam

# श्रीशबरिगिरीशाष्टकम्

## Document Information

Text title : shabarigiriishaaShTakam

File name : shabarigiri8.itx

Category : aShTaka, deities_misc, ayyappa

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Shri Shabarigirisha Ashtakam

# श्रीशबरिगिरीशाष्टकम्

यजनसुपूजितयोगिवरार्चित यादुविनाशक योगतनो
यतिवरकल्पितयन्त्रकृतासनयक्षवरार्पितपुष्पतनो ।
यमनियमासनयोगिहृदासनपापनिवारणकालतनो
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ १॥

मकरमहोत्सव मङ्गलदायक भूतगणावृत देवतनो
मधुरिपुमन्मथमारकमानित दीक्षितमानस मान्यतनो ।
मदगजसेवित मञ्जुलनादकवाद्यसुघोषितमोदतनो
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ २॥

जय जय हे शबरीगिरिनायक साधय चिन्तितमिष्टतनो
कलिवरदोत्तम कोमलकुन्तल कञ्जसुमावलिकान्ततनो ।
कलिवरसंस्थित कालभयार्दित भक्तजनावनतुष्टमते
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ३॥

निशिसुरपूजनमङ्गलवादनमाल्यविभूषणमोदमते
सुरयुवतीकृतवन्दन नर्तननन्दितमानस मञ्जुतनो ।
कलिमनुजाद्भुत कल्पितकोमलनामसुकीर्तनमोदतनो
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ४॥

अपरिमिताद्भुतलील जगत्परिपाल निजालयचारुतनो
कलिजनपालन सङ्कटवारण पापजनावनलब्धतनो ।
प्रतिदिवसागतदेववरार्चित साधुमुखागतकीर्तितनो
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ५॥

कलिमलकालन कञ्जविलोचन कुन्दसुमानन कान्ततनो
बहुजनमानसकामसुपूरण नामजपोत्तम मन्त्रतनो ।
निजगिरिदर्शनयातुजनार्पितपुत्रधनादिकधर्मतनो
जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ६॥

शतमुखपालक शान्तिविदायक शत्रुविनाशक शुद्धतनो
    तरुनिकरालय दीनकृपालय तापसमानस दीप्ततनो ।
हरिहरसम्भव पद्मसमुद्भव वासवशम्भवसेव्यतनो
    जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ७॥

ममकुलदैवत मत्पितृपूजित माधवलालितमञ्जुमते
    मुनिजनसंस्तुत मुक्तिविदायक शङ्करपालित शान्तमते ।
जगदभयङ्कर जन्मफलप्रद चन्दनचर्चितचन्द्ररुचे
    जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ८॥

अमलमनन्तपदान्वितरामसुदीक्षित सत्कविपद्यमिदं
    शिवशबरीगिरिमन्दिरसंस्थिततोषदमिष्टदमार्तिहरम् ।
पठति शृणोति च भक्तियुतो यदि भाग्यसमृद्धिमथो लभते
    जय जय हे शबरीगिरिमन्दिरसुन्दर पालय मामनिशम् ॥ ९॥

इति श्री शबरीगिरिशाष्टकं सम्पूर्णम् ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shri Shabarigirisha Ashtakam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*